— जल्पयमानः, जल्पयिष्यमाणः, — जाजल्पयमानः, जाजल्पिष्यमाणः ;

[1]प्रजल्ल्-प्रजल्पौ-प्रजल्पः ; — — —

जल्पितम्-तः, जल्पितः, जिजल्पिषितः जाजल्पितः-तवान् ;

जल्पः, [2]जल्पाकः-[A]जल्पाकी, जल्पः, जिजल्पिषुः, जाजल्पः ;

जल्पितव्यम्, जल्पयितव्यम्, जिजल्पिषितव्यम्, जाजल्पितव्यम् ;

जल्पनीयम्, जल्पनीयम्, जिजल्पिषणीयम्, जाजल्पनीयम् ;

जल्प्यम्, जल्प्यम्, जिजल्पिष्यम्, जाजल्प्यम् ;

ईषज्जल्पः-दुर्जल्पः-सुजल्पः ; — —

जल्प्यमानः, जल्प्यमानः, जिजल्पिष्यमाणः, जाजल्प्यमानः ;

[B]जल्पः, जल्पः, जिजल्पिषः, जाजल्पः ;

जल्पितुम्, जल्पयितुम्, जिजल्पिषितुम्, जाजल्पितुम् ;

[3]जल्पा, जल्पना, जिजल्पिषा, जाजल्पा ;

जल्पनम्, जल्पनम्, जिजल्पिषणम्, जाजल्पनम् ;

जल्पित्वा, जल्पयित्वा, जिजल्पिषित्वा, जाजल्पित्वा ;

प्रजल्प्य, प्रजल्प्य, प्रजिजल्पिष्य, प्रजाजल्प्य ;

जल्पम् २, } जल्पम् २, } जिजल्पिषम् २, } जाजल्पम् २ ; }
जल्पित्वा २, } जल्पयित्वा २, } जिजल्पिषित्वा २, } जाजल्पित्वा २. }

(593) " जष हिंसार्थः " (I-भ्वादिः-688. सक. सेट्. पर.)

जाषकः-षिका, जाषकः-षिका, जिजषिषकः-षिका, जाजषकः-षिका ;

जषिता-त्री, जाषयिता-त्री, जिजषिषिता-त्री, जाजषिता-त्री ;

इत्यादीनि सर्वाण्यपि रूपाणि खषधातुवत् (346) बोध्यानि । जषन्[C] ।

---

1. 'संयोगान्तस्य—' (8-2-23) इति पकारस्य लोपः ।
2. 'जल्पभिक्षकुट्टलुण्ठवृङः षाकन्' (3-2-155) इति तच्छीलादिषु कर्तृषु षाकन् प्रत्ययः । षाकनः षित्त्वात् स्त्रियां 'षिद्गौरादिभ्यश्च' (4-1-41) इति ङीष् ।
3. 'गुरोश्च हलः' (3-3-103) इति स्त्रियां भावादावङ् ।

A. 'प्रचलदखिलक्ष्माभृन्मूलोपलव्यतिघट्टनो-
त्रुबणमणिशिखाजल्पाकीभिः फणाभिरहीश्वरः ॥' अनर्घराघवे-6.81.

B. 'गोपायतां धर्ममधूपितात्मनां जल्पान् विमुच्याभवदुद्यमो जये ॥' धा. का. 1.51.

C. 'इत्युक्तः सुरकाखिखाषिणमसावूचे जगच्छेषकान्
नित्यं ते जषते झषादिवपुषे रक्षश्चमूशाषिणे । धा. का. 1.87.